P.V.G.'s

# Muktangan English School & Jr. College,

44, Vidyanagari, Parvati, Pune - 411009.

## Ternimal Examination (2025-26)

## Standard - IX

Subject : Sanskrit (Composite) Marks : 40

Date : 14-10-2025 Time : 8.00 to 10.00 am

### प्रथम: विभाग: – सुगमसंस्कृतम् (४)

**प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (केवलं ४)** **(२)**

१) 

२) 

३) 

४) 

५) 

**आ) सङ्ख्या अक्षरै: अङ्कै: वा लिखत । (३ त:२)** **(१)**

१) पञ्चत्रिंशत् –  २) नवनवति: –  ३) ६३ –

**प्र.१ इ) अक्षरै: समयलेखनं कुरुत । (३ त: २)** **(१)**

१) १०.१५ –  २) १.३० –  ३) ४.०० –

### द्वितीय: विभाग: – गद्यम् (१५)

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत ।**

'एषा रणरङ्गात् यावत् न निवार्यते तावत् जय: सर्वथा न प्राप्यते' इति चिन्तयित्वा शत्रुसैनिका: युगपत् आक्रम्य ताम् अवरुद्धवन्त:। शत्रुसैनिका: ते असङ्ख्या: आसन्, विश्पला तु एकाकिनी ! तथापि तस्या: मनसि न भीतिलेश: अपि आसीत्। प्रत्युत द्विगुणितेन उत्साहेन युद्धं कृतवती।

युद्धसमये शत्रुसैनिका: तस्या: एकं पादं कर्तितवन्त:। अनन्तरम् 'इत: परम् एतस्या: कारणात् पीडा न भविष्यति' इति निर्णयं कृत्वा ते शिबिरं प्रतिगतवन्त:।

**एकवाक्येन उत्तरत । (२ त: १)** **(१)**

१) कस्या: मनसि भीतिलेश: अपि न आसीत्?

२) विश्पला कथं युद्धं कृतवती?

**आ) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** **(१)**

१) शत्रुसैनिका: पृथक् आक्रम्य विश्पलाम् अवरुद्धवन्त: ।

२) शत्रुसैनिका: खेलराजस्य पादं कर्तितवन्त: ।

**इ) सन्धिविग्रहं कुरुत ।** **(१)**

तथापि - ____________ + ____________ ।

**ई) सूचनानुसारं कृती: कुरुत । (३ त: २)** **(२)**

१) गद्यांशात: योग्यं विशेषणं चिनुत ।

अ) __________ शत्रुसैनिका: ।

आ) __________ पादम् ।

**२) लकारं लिखत ।**

अ) जय: सर्वथा न प्राप्यते ।

आ) मनसि न भीतिलेश: अपि आसीत् ।

३) गद्यांशात् व्दे (२) त्वान्त अव्ययम् चित्वा लिखत ।

**प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत ।**

(त्रयोदशवर्षीया तनया सुखवासन्दे उपविश्य एकेन हस्तेन कुर्कुरिकां खादति । अपरेण हस्तेन चलभाषं चालयति । तदानीं द्वारघण्टिकाम् आकर्ण्य माता द्वारम् उद्घाटयति । तनयाया: सख्यौ द्वारे एव स्थित्वा ताम् आह्वयत:।)

श्रुति: - तनये, सत्वरं क्रीडनाय आगच्छ, बहि: खेलाम:।
तनया - अहं गृहे एव खेलामि ।
राजसी - किं खेलसि ?
तनया - (चलभाषं दर्शयित्वा) एतस्मिन् चलभाषे यष्टिकन्दुकक्रीडा, पादकन्दुकक्रीडा, वाहनक्रीडा, पत्रक्रीडा, चतुर'क्रीडा, इत्यादय: सर्वा: क्रीडा: सन्ति । क्रीडाङ्गणं गत्वा खेलनस्य आवश्यकता एव नास्ति । अहं न आगच्छामि । (सख्यौ क्रीडार्थं निर्गच्छत:। माता पाकगृहं गच्छति ।

**१) एकवाक्येन उत्तरत । (३ तः २)** **(२)**

१) तनया कति वर्षीया आसीत्?

२) चलभाषे काः क्रीडाः सन्ति?

३) के क्रीडार्थं निर्गच्छतः?

**२) कः कं वदति ।** **(१)**

''तनये, सत्वरं क्रीडनाय आगच्छ, बहिः खेलामः ।''

**३) सूचनानुसारं कृतीः कुरुत । (४ तः २)** **(२)**

१) शब्दस्य वर्णविग्रहं कुरुत । द्वारम् - ------ ।

२) गद्यांशात् विशेषणं चित्वा लिखत । ________ हस्तेन ।

३) गद्यांशात् पूर्वकालवाचक - ल्यबन्तं - अव्ययं चित्वालिखत । (केवलं १)

**प्र. २ इ) गद्यांशं पठित्वा माध्यममाषया अनुवादं कुरुत ।** **(३)**

श्रीराम-भिकाजी-वेलणकरमहोदयः । सः कोलकतानगरे डाकतारविभागस्य निर्देशकरूपेण कार्यरतः आसीत् । तस्य कार्यकाले एकस्मिन् दिने कोऽपि दुःखितः केरल-प्रदेशीयः सैनिकः महोदयं मेलितुम् आगतः । सः तस्य पित्रोः स्वास्थ्यविषये किञ्चिदपि ज्ञातुम् असमर्थः । यतः तदा पत्रस्य प्रवासकालः केरलतः अरुणाचलप्रदेशपर्यन्तं क्वचित् मासाधिकोऽपि आसीत् ।

**प्र. २ ई) माध्यममाषया उत्तरं लिखत । (प्रस्तावना अपेक्षिता) (२ तः १)** **(२)**

१) किं मिथ्या? किं वास्तवम्? इति पाठस्य तात्पर्यं माध्यमभाषया लिखत?

२) विश्पलायाः शौर्यस्य वर्णनं कुरुत ।

## तृतीयः विभागः – पद्यम् (१०)

**प्र. ३ अ) पद्यांशान् पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१) सुखार्थी चेत् त्यजेविद्यां विद्यार्थी चेत् त्यजेत्सुखम् ।
सुखार्थिन कुतो विद्या कुतो विद्यार्थिनः सुखम् ।।

२) धनमलब्धं काङ्क्षेत्, लब्धं रक्षेत् प्रयत्नतः ।
इति विज्ञाय मतिमान् स्वस्थाजं न परित्यजेत् ।।

३) स्थानभ्रष्टा न शोभनो दन्ताकेशा नखा नराः ।
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ।।

**आ) एकवाक्येन उत्तरत । (३ तः २)** **(१)**

१) विद्यार्थी किं त्यजेत्?

२) सुखार्थी किं त्यजेत्?

३) मतिमान् किं न परिंत्यजेत्?

**२) सुचनानुसारं कृती: कुरुत । (२ तः १)**

अ) विरुद्धार्थकशब्दान् लिखत । (१)

१) अलब्धम् × __________ ।

२) सुखम् × __________ ।

३) त्यजेत् × __________ ।

**प्र. ३ आ) स्थानभ्रष्टा न शोभन्ते ----- । श्लोकात्** **(२)**

**प्रथमा विभक्तेः रुपाणि चित्वा लिखत । (केवलं २)**

**३) जालरेखाचित्रं पूरयत ।**

**पद्यांश पठित्वा जालरेखाचित्रं पूरयत ।**

अ

आ




**प्र. ३ अ) पद्यांशं पठित्वा माध्यममाषया अनुवादं कुरुत । (२ तः १)** **(२)**

१) दृष्टिपूतं न्यसेत् पदं वस्त्रपूतं पिबेत् जलम् ।
सत्यपूतां वदेत् वाणीं मन:पूतं समाचरेत् ।।

२) गुणा: कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम् ।
केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदा: ।।

**प्र. ३ इ) श्लोकं शुद्धं पूर्णं च लिखत । (२ तः १)** **(२)**

१) यस्य षष्ठी ------------- ।।

२) अक्रोधेन जयेत् ---------- ।।

**प्र. ३ ई) माध्यमभाषा उत्तरं लिखत । प्रस्तावना अपेक्षिता ।** **(२)**

१) धेनव: कथं 'लोकमातर:' श्लोकस्य आधारेण स्पष्टीकुरुत?

२) श्लोकस्य आधारेण 'श्रोतुं कर्णो --------' अवयवस्य उपयुक्तता लिखत ।

## चतुर्थः विभागः – व्याकरणम् (७)

**प्र. ४ अ) पृथक् कुरुत् । (६ तः ४)** **(२)**

| नाम | सर्वनाम | क्रियापद | विशेषणम् |
| --- | --- | --- | --- |
| | | | |

मञ्जूषा – (देवदत्तः एतत्, शूर, अभवन्, रणकुशला लभते)

**आ) समासाः पृथक् कुरुत । (६ तः ४)** **(२)**

| इतरेतरव्दन्व्दः | समाहारव्दन्व्दः |
| --- | --- |
| | |
| | |

१) स्कंदगणेशौ  २) मूषकमार्जारम्  ३) पत्रपुष्पफलम्

४) रामसीते  ५) चन्द्रसूर्यो  ६) वृक्षलता

**इ) योग्यं विशेषणं चित्वा वाक्यं पुनर्लिखत । (३ तः २)** **(२)**

१) ____________ चन्द्र आकाशे वर्तते । (धवले / धवलः)

२) ____________ वैमानिकाः । (कुशलाः / कुशलः)

३) ____________ मन्दिरम् । (नूतना / नूतनम्)

**ई) योग्यं रूपं चिनुत लिखत च । (३ तः २)** **(१)**

१) (बालकः/बालकेन) जलं पिबतु ।

२) धेनुभिः तृणानि ________। (भुक्तम् / भुक्तानि)

३) त्वं संस्कृतेन सम्भाषणं _____। (कुरु, करोतु)

## पञ्चमः विभागः – लेखनकौशलम् (४)

**प्र. ५ अ) अव्ययानां / धातूनाम् उपयोगं कृत्वा वाक्ये लिखत । (४ तः २)** **(२)**

१) प्रति  २) सह  ३) रुच्  ४) रक्ष्

**प्र. ५ आ) सङ्ख्या – विशेषणानाम् उपयोगं कृत्वा वाक्यद्वयं पूरयत । (३ तः २)** **(२)**

१) वयं ________(४) गीतानि गायामः ।

२) __________ (१) नगरे सः वसति स्म ।

३) तयोः _______(२) परस्परमेलनं न आसीत् ।